# Shri Shripadaraja Ashtakam 2

# શ્રીશ્રીપાદરાજાષ્ટકમ્ ૨

## Document Information

Text title : Shri Shripadaraja Ashtakam 2

File name : shrIpAdarAjAShTakam2.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : shrInidhiyati

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# શ્રીશ્રીપાદરાજાષ્ટકમ્ ૨

શ્રીમત્યા જામ્બવત્યા યદુપતિનગરે પૂજિતઃ ફલ્ગુણેન
    પ્રાપ્રસ્તેનાર્ચિતાઙ્ઘ્રિસ્સકલ સુખકરે પાણ્ડુરઙ્ગેતરઙ્ગે ।
ભૂમૌક્ષેત્રેથ ગુપ્તસ્સકલ બુધગુરોર્યસ્યલબ્ધોવતાન્માં
    સ્વપ્ને શ્રીમાન્ રમેશઃ પ્રભુવરતનયા સત્યભામા સમેતઃ ॥ ૧॥

શ્રીમત્ શ્રીપાદરાજ પ્રમુખ યતિવરાનાદરાધીત શાસ્ત્રા-
    નાહૂયાતિ પ્રમોદા પ્રવદત ભવતાં તાવદેવાદ્ય શિષ્યઃ ।
યાવત્સામર્થ્યમસ્તીત્યુદિતવતિ ગુરૌ પ્રાગુપન્યસ્તવાન્યઃ
    શ્રીમાનાદ્યન્તયુક્તાં બુધસદસિ સુધાં સોવતાન્માં યતીન્દ્રઃ ॥ ૨॥

સાયઙ્કાલે કદાચિત્ ગુણગણભરિતે સ્પર્ણવર્ણે યતીન્દ્રે
    દૂરેગ્રામઃ પુરસ્તાત્કિયતિ કથય મે બાલકેતિ બ્રુવાણે ।
સૂર્યં માં સ્થૈરભાં સ્વં સકલ બુધમણે પશ્ય કિં ત્વાં બ્રુવેહં
    યો વાદીત્સ્વર્ણવર્ણં ગુરુમિતિ સહસા સોવતાન્માં યતીન્દ્રઃ ॥ ૩॥

જિત્વાનીશં નૃપેણ પ્રબલ ગજપતિં કઙ્કણદ્વન્દ્વમેકં
    યસ્મૈ દત્તં મનોજ્ઞં તદનુ નરપતે ભોગનાર્યો નિશાયામ્ ।
યદ્રૂપઃ શ્રીરમેશઃ પરિજનસહિતે જાગરૂકે દ્વિતીયં
    દત્તં ભૂપાળમૌળૌ પુનરપિ દદતાસોવતાન્માં યતીન્દ્રઃ ॥ ૪॥

પાતુઃ શ્રીપાદરાજ સખિવર રઘુનાથાર્યયુક્તઃ કદાચિત્
    ગઙ્ગાસ્નાનાય ગચ્છન્ પતિનૃપસદનં પ્રાપ્ય ભૈક્ષં યયાચે ।
પાદપ્રક્ષાળનાર્થં સ્થિતવતિ યતિપે ભર્ત્સનાદસ્ય કોપાત્
    ગેહે દગ્ધેતિ નમ્રં પદયુગળગતં યો રરક્ષાવનીશમ્ ॥ ૫॥

યચ્છિષ્યો વ્યાસરાજઃ પ્રતિભટજનતા સર્વગર્વાપહર્તા
    કર્તા ગ્રન્થત્રયસ્ય પ્રતિભટ વિજય પ્રોચ્ચશાસ્ત્રોત્તમસ્ય ।
પ્રખ્યાતા યત્પ્રશિષ્યા જગતિ ચ વિજયીન્દ્રાખ્ય યોગીન્દ્રચન્દ્રા
    શ્રીમત્ શ્રીવાદિરાજ પ્રમુખ યતિવરા સોવતાન્માં યતીન્દ્રઃ ॥ ૬॥

યદ્વાગ્વજ્રાભિદોચ્છ પ્રબલતમ મહાગ્રન્થ વજ્રેણ હૃષ્ય
    દુર્વાદિક્ષ્માધરાણાં યતિવરસુરપચ્છેદયામાસ પક્ષાન્ ।
યસ્ય શ્રીવાદિરાજ પ્રમુખ યતિવરૈર્વર્ણિતુ નૈવ શક્યં
    માહાત્મ્યં તાપસેન્દ્રઃ સ ભવતુ નિતરાં ભૂયસે શ્રેયસે મે ॥ ૭॥

નીલાપાર્થાર્ચિતાઙ્ઘ્રિઃ કલુષય ચ હરે ભીમરથ્યાસ્સુતીરે
    રઙ્ગક્ષેત્રેથ ગુપ્તઃ સકલ સુરપતિર્વેણુગોપાલકૃષ્ણ ।
સ્વપ્ને લબ્ધોયમસ્યા દ્વિજવર ગુરવે વ્યાસરાજાય યેના-
    દાયી શ્રીપાદરાજઃ સ ભવતુ નિતરા ભૂયસે શ્રેયસે મે ॥ ૮॥

ઇતિ શ્રીનિધિયતિવિરચિતં શ્રીપાદરાજાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishnananda Achar

---

*Shri Shripadaraja Ashtakam 2*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*